## लोपश्चास्यान्यतरस्यां म्वोः। (१०७/२३३३)

योऽयमुकारोऽसंयोगपूर्वः तदन्तस्य प्रत्ययस्य अन्यतरस्यां लोपो भवति [1]वकारमकारादौ प्रत्यये परतः। सुन्वः, सुनुवः। सुन्मः, सुनुमः। तन्वः, तनुवः। तन्मः, तनुमः। प्रत्ययस्य इत्येव, युवः। युमः। असंयोगपूर्वस्य इत्येव, शक्नुवः। शक्नुमः। लुक् इति वर्तमाने लोपग्रहणमन्त्यलोपार्थम्॥

## नित्यं करोतेः। (१०८/२५४८)

करोतेः उत्तरस्य उकार[2]प्रत्ययस्य वकारमकारादौ प्रत्यये परतः नित्यं लोपो भवति। कुर्वः। कुर्मः। उकारलोपस्य दीर्घविधौ अस्थानिवद्भावाद् 'हलि च' (८. २. ७७/३५४) इति दीर्घत्वं प्राप्तम्, 'न भकुर्छुराम्' (८. २. ७९/१६२९) इति प्रतिषिध्यते॥

## ये च। (१०९/२५४९)

यकारादौ[3]च प्रत्यये परतः करोतेः उत्तरस्य उकारप्रत्ययस्य नित्यं लोपो भवति। कुर्यात्, कुर्याताम्, कुर्युः॥

## अत उत् सार्वधातुके। (११०/२४६७)

[4]उकारप्रत्ययान्तस्य करोतेः अकारस्य स्थाने उकारः आदेशो भवति सार्वधातुके क्ङिति परतः। [5]कुरुतः। कुर्वन्ति। सार्वधातुकग्रहणं किम्? भूतपूर्वेऽपि सार्वधातुके [6]यथा स्यात्, कुरु। तपरकरणं [7]लघूपधस्य गुणनिवृत्त्यर्थम्। क्ङिति इत्येव, करोति। करोषि। करोमि॥

## श्नसोरल्लोपः। (१११/२४६९)

[8]श्नस्य अस्तेश्च अकारस्य लोपो भवति सार्वधातुके क्ङिति परतः। [9]रुन्धः। रुन्धन्ति। [19]भिन्तः। भिन्दन्ति। अस्तेः[11] – स्तः। सन्ति। क्ङितीत्येव – [12]भिनत्ति। अस्ति। श्नसोः इति आकारस्य पररूपत्वं शकन्ध्वादिषु द्रष्टव्यम्॥

## श्नाभ्यस्तयोरातः। (११२/२४८३)

श्ना इत्येतस्य [13]अभ्यस्तानां चाङ्गानाम् आकारस्य लोपो भवति सार्वधातुके क्ङिति परतः। लुनते। लुनताम्। अलुनत[14]। अभ्यस्तानाम् – मिमते। मिमताम्। अमिमत। संजिहते। संजिहताम्। समजिहत। श्नाभ्यस्तयोः इति किम्? यान्ति। वान्ति। आतः इति किम्? बिभ्रति[15]। क्ङिति इत्येव, अलुनात्। [16]अजहात्। आद्ग्रहणं स्पष्टार्थम्॥

---

1. मकारवकाराद्योः प्रत्यययोः फ. ह. 2. प्रत्ययान्तस्य वकारादौ मकारादौ च क. 3. च नास्ति फ. 4. उप्रत्ययान्तस्य फ. 5. कुरुथः कुरुथ। कुर्वः कुर्मः इत्यधिकम् फ. ह. 6. इति क. 7. किम् इत्यधिकम् क. 8. श्नः इत्येतस्य फ. 9 नास्ति ह. 10. छिन्तः, छिन्दन्ति ह. 11. खल्वपि इत्यधिकम् फ. 12. छिनत्ति फ, अस्ति नास्ति फ. 13. अभ्यस्ताङ्गानां च फ, अभ्यस्तसञ्ज्ञकानाम् ह. 14. लुनतः पुनते पुनताम् पुनतः इत्यधिकम् ह. ब. क. इ. 15. जिघ्रति इत्यधिकम् फ, जिह्रियति इत्यधिकम् क. 16. अपुनात् ह.